कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M2001 विषय कर्मकांड

नांव सायंप्रातर्होम:

लेखक / लिपीकार आबाजी बोवसे

पृष्ठ 23 काळ — पूर्ण / अपूर्ण

अथ अग्नि अनु गमन प्रायश्चि
तं॥ एवंगुण ० तिथौ॥ अनुगता
ग्निप्रायश्चित्तं करिष्ये॥ अनुगता
ग्निप्रायश्चित्तकर्तुं स्थंडिलं गोम
यप्रदक्षिणमुपलिप्य॥ षडले

खामुल्लिख्य ॥ जुहोदमुनाऽमन
सायविद्वान् ॥ गृह्याग्निं प्रतिष्ठाप
यामी ॥ त्यौचैरिश्रंगेतिध्यानं ॥
परिसमोहनपरिस्तरणपरियुक्ष
णं कृत्वा ॥ अग्नेरुत्तरतोंगारानि

१

रूह्य तेष्वाज्यमधिश्रित्य ज्वलता
दर्भेणावज्वाल्य ॥ अंगुष्ठपर्वमा
त्रैस्त्रिःप्रक्षालितं तेनैव पुनर्ज्वल
ता ज्वं च त्रिः पर्यग्निं कृत्वा ॥ तदु
त्सुकं निरस्य ॥ अंगारेग्नो निर

स्य॥ अथ उपस्पृश्य॥ आसनतः
भुमिं प्रोक्ष्य॥ दर्भं निधाय॥ तदु
परि आज्यस्थापनं॥ विश्वानि
न इति अग्नि अलंकरणं॥ श्रु
वेणाज्यमादाय॥ अयाश्चेति

विमदो याज्ञ अग्निः पंक्तिः॥ अनु
गताग्निः प्रायश्चित्त आज्यहो
मे वि०॥ ॐ अयाश्चाग्नेस्यन
भिशस्तिश्च सत्यमित्वमयाअ
सि॥ अयासावयसाकृतोया

संनहव्यमृहिषेयानोधेहिभेष
जंस्वाहा॥ अग्नये अयसइदं
ॐ भूर्भुवःस्वःस्वाहा॥ प्रजापते
यइदं॥ परिस्तरणान्युत्तरेवि
सृजेत्॥ परिसमुह्य॥ तूष्णीअ

लंकृत्य॥ मानस्तोकेतिभस्मधा
रणं॥ यस्यस्मृत्या०॥ अनेनुग
ताग्निप्रायश्चित्तहोमाख्येन
कर्मणातेनश्रीभगवान्यज्ञ
नारायणःप्रीयतांनमम॥ छ॥

णांगौपायनानां लौपायनानां बंधुः
सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकर्चा
ऋषयः॥ अग्निर्देवता द्विपदावि
राट् छंदः॥ अग्न्युपस्थाने वि० ॥
ॐ अग्ने त्वन्नो अंतम उत त्राता

सिवो भवावरूथ्यः ॥ वसुरग्निर्व
सुश्रवा अच्छानक्षि द्युमत्तमं रइं
दाः ॥ सनो बोधि श्रुधि हवमुरु
ष्याणो अघायतः समस्मात् ॥
तं त्वा शोचिष्ठ दीदिवः सुम्नाय

१

नूनमीमहे सखिभ्यः ॥ तंतु तन्वं
नुवामहे वोऽग्निर्जगती ॥ अग्न्यु
पस्थाने वि० ॥ ॐ तंतुतन्वं रजेस
भानुमन्विहि ज्योतिष्मतः पथो
रक्षाधियाकृतान् ॥ अनुल्वणं व

यत्तज्ञोगुवामुपोमनुर्भेव ज्ञनया
देव्यंज्ञनेनम्॥ हिरण्यगर्भइत्यस्य
हिरण्यगर्भंप्रज्ञापतिस्त्रिष्टुप्॥
प्रजापतिउपस्थानेवि०॥ ॐ हिर
ण्यगर्भःसमवर्तताग्नेभूतस्यजा १०

तःपतिरेकआसीत्॥ सदाधार
पृथिवींद्यामुतेमांकस्मैदेवायह
विषाविधेम॥ प्रजापतेर्हिरण्य
गर्भःप्रजापतिस्त्रिष्टुप्॥ प्रजाति

उपस्थाने वि० ॥ ॐ प्रजापते न त्व
देतान्यन्यो विश्वा जातानि परिता
बभूव ॥ यत्कामास्ते जुहुमस्तन्नो
अस्तु वयं स्याम पतयो रयीणां ॥
मा नस्तोकेति कुत्सो रुद्रो जगती ॥ ११

विभूतिग्रहणे वि० ॥ ॐ मान
स्तोके तनये मा न आयौ मा नो
गोषु मा नो अश्वेषु रीरिषः ॥ वीरा
न्मा नो रुद्र भामितो वधीर्हविष्म
न्तः सदमित्त्वा हवामहे ॥ त्र्यायुषं

जमदग्नेरिति ललाटे ॥ कश्यप
स्य त्र्यायुषमिति कंठे ॥ अगस्त्य
स्य त्र्यायुषमिति नाभौ ॥ यद्देवा
नां त्र्यायुषमिति दक्षिणस्कंधे ॥
तन्नो अस्तु त्र्यायुषमिति वामस्कं

१२

धे ॥ शतायुषमिति शिरसि ॥ बला
युषमिति सर्वांगे ॥ ॐ च मे स्वर
श्च मे यज्ञोप च ते नमश्च ॥ यत्ते
न्यूनं तस्मै त उपयत्तेतिरिक्तं तस्मै
ते नमः ॥ अग्नये नमः ॥ ॐ स्वस्ति

श्रद्धां मेधां यशः प्रज्ञा विद्यां बुद्धिं श्रियं बलं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनोन मोनमः॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णो

१२

दि संपूर्णं स्यादिति श्रुतिः॥ प्रायश्चित्तान्यनेकानि तपः कर्मात्मिकानि वै॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परं॥ कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः॥

जलंभीत्यायथापञ्चेनरकाद्दुह
राम्यहं॥ नमस्तेगार्हपत्यायनम
स्तेदक्षिणाग्नये॥ नमआहवनी
यायमहावेद्यैनमोनमः॥ कौंड
हृपोपपाद्यायकर्मब्रंह्मस्वरूपि

णे॥ स्वर्गापवर्गरूपाययज्ञेशाय
नमोनमः॥ यस्यस्मृत्याचनामो
क्तिया॰॥ अनेनसायमऔपा
सनाख्येनकर्मणातेनश्रीभग
वानयज्ञरूपीपरमेश्वरःप्रीय

तां न मम ॥ इति सायंहोमसमाप्तः ॥ १ ॥
अथ प्रातर्होमप्रारंभः ॥ एवं गुणवि० ॥
ममोपात्तदुरितक्षय ॥ प्रातरौपास
नं तंदुलैर्होष्ये ॥ चत्वारि शृंगेति पूर्ववत्
त् कृत्वा ॥ अथ दानं कुर्यात् ॥ ॐ सूर्या
य स्वाहा ॥ सूर्याय इदं० ॥ ॐ प्रजा

१५

पतये स्वाहा ॥ प्रजापतय इदं० ॥ पूर्ववत्
त् परिस्तरणादि विसर्जयेत् ॥ तिष्ठन् ॥
उपस्थानं कृत्वा ॥ सूर्यो नो दिवस्पात्वित्य
स्य सूर्यः चक्षुः सूर्यो गायत्री ॥ सूर्योप
स्थानमंत्र जपे विनियोगः ॥ ॐ सूर्यो
नो दिवस्पातु वातो अंतरिक्षात् ॥

अग्निर्नः पार्थिवेभ्यः॥ उदुत्यं काण्वः प्रस्कण्वः सूर्यो गायत्री॥ सूर्योपस्थानमंत्रजपे वि०॥ ॐ उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥ दृशेविश्वायसूर्यं॥ चित्रंदेवानामाग्नि

१६

रसः पुत्रः कुत्सः सूर्यस्त्रिष्टुप्॥ सूर्योपस्थानमंत्रज०॥ ॐ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥ नमो

मित्रस्यसूर्यो भितपासूर्यो जगती
सूर्योपस्थानमंत्रजपे ॥ ॐ नमो
मित्रस्यवरुणस्यचक्षसे महोदेवा
यतदृतंसपर्यत ॥ दूरेदृशेदेवजा
तायकेतवे दिवस्पुत्रायसूर्याय

१७

शंसत ॥ हिरण्यगर्भ इति ऋक् ॥
प्रजापते इति ऋक् ॥ इत्युपविश्य
परिस्तरणान्युत्तरे विसृजेत् ॥ परि
मृज्य ॥ पर्युक्ष्य ॥ तूष्णीं अलंकृत्य
मानस्तोके इति ऋक् ॥ अयंतेत्यस्य

मंत्रस्य हिरण्यगर्भो ग्निस्त्रिष्टुप्॥
समित्समारोपणे वि॰॥ ॐ अयंते
योनिर्ऋत्वियो यतो जातो अरोच
थाः॥ तं जानंनग्न आसीदाथानोव
र्धया गिरः॥ यस्य स्मृत्या॥ अनेन

१८

प्रातरुपयासनाख्येन कर्मणा तेन
श्रीभगवन्यज्ञरूपीपरमेश्वरः प्री
यतां न मम॥ विघ्नवेनमेविघ्न
वेनमेः॥ इति प्रातर्होमः समाप्तः॥
प्रत्यवरोहेत्यस्य मंत्रस्य हिरण्यग

मौग्निस्त्रिष्टुप् ॥ समिधहोमेवि ॥
ॐ प्रत्यवरोह जातवेदः पुनस्त्वं देवे
भ्यो हव्यं वह नः प्रजानन् ॥ प्रजां पुष्टिं
रयिमस्मासु धेह्यथा भव यजमा
नाय शं योः स्वाहा ॥ प्रदक्षिणस्यां ॥ १८

ॐ अग्ने नय सुपथा राये अस्मान्वि
श्वानि देव वयुनानि विद्वान् ॥ युयो
ध्य१स्मज्जुहुराणमेनो भूयिष्ठां ते
नमउक्तिं विधेम ॥ अग्ने त्वं पारया
नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि

विश्वा॥ पृक्ष पृथ्वी बहुला न उर्वीं भ
वा तोकाय तनयाय शंयोः॥ अग्ने त्व
मस्मद्युयोध्यमीवा अनग्नित्रा अभ्य
मंत कृष्टीः॥ पुनरस्मभ्यं सुविताय दे
वक्षां विश्वेभिरमृतेभिर्यजत्र॥ पा

२०

त्वियेयसे आले अरोचथाः॥
तं आनेरगु आसीदा यानो वर्द्धि
या गिरः॥ यस्य स्मत्या॰ अने
न प्रातरउपासनाख्य न वर्मणा
ने मे श्री॰ प्रातहैमः समाप्तः॥

प्रत्यवरोहस्येत्यस्यमंत्रस्य हिरण्य
गर्भोग्निस्त्रिष्टुप् ॥ समिधहोमे
वि० ॥ ॐ प्रत्यवरोह जातवेदःपुन
स्त्वंदेवेभ्योहव्यंवहनःप्रजानन् ॥ १९
प्रजांपुष्टिंरयिमस्मासुधेह्यथा

यज्ञ भवयजमानायःस्वाहा ॥ इ
तिसायंप्रातर्होमःसमाप्तः ॥

॥हे पुस्तक आबाजी बोकसे याहा
॥चे असे सत्यं॥

हि नो अग्ने पायुभिरजस्रैरुत प्रियेस
दन आ शुशुक्कान्॥ मा ते भयं जरिता
रं यविष्ठ नूनं विदन्मापरं सहस्वः॥ मा
नो अग्ने वसृजो अघायाविष्यवे रिप
वे दुछुनायै॥ मा दत्वते दशते मादते नो

इतिसांयंप्रातरहोमसमाप्तः